SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
Vol. 1, Issue-2, (Apr-Jun) 2025

# भारतीयज्ञानपरम्परां प्रति संस्कृतनारीकवीनां योगदानम्-एकमध्ययनम्

## Bhāratīyajñānaparamparāṃ prati saṃskṛtanārīkavīnāṃ yogadānam-ekamadhyayanam

Shesadev Parida
Research Scholar
Dept. of Sanskrit, Utkal University,
Vani Vihar, Bhubaneswar, Odisha, India
Email: paridashesadev65@gmail.com

**Abstract:** भारतीयज्ञानपरम्परा प्राचीनतमं व्यापकतमं च ज्ञानसंग्रहम् अङ्गीकरोति,यत्र धर्मः, दर्शनम्, विज्ञानम्, गणितम्, आयुर्वेदः, योगः, साहित्यं, सङ्गीतं, स्थापत्यकला च समाहितम् अस्ति। एषा परम्परा न केवलं भारतस्य सांस्कृतिकं वैभवं प्रकटयति, अपि तु सम्पुर्णमानवजातेः कल्याणाय अपि प्रयोजनीया अस्ति। एषा परम्परा वेदोपनिषदादिभ्यः आरभ्यः महाभारते, रामायणे, पुराणेषु, विविध-दर्शनेषु योगशास्त्रादिषु च विस्तृता दृश्यते। भारतीयदर्शनप्रणाल्यः, यथा— सांख्यं, योगः, न्यायः, वैशेषिकः, वेदान्तः मीमांसा च जीवनस्य चरमसत्यम्, आत्मवोधं, मोक्षमार्गं च विवृण्वन्ति। भारतीयज्ञ ानपरम्परायाम् आत्मज्ञानं, तत्त्वविचारः जीवनस्य परमलक्ष्यं मोक्षप्राप्तिः च मुख्यतया उपदिश्यते। अत्र ज्ञानं न केवलं वैद्धिकं, अपितु अनुभूतिसिद्धं, प्रयोगाधिष्ठितं च अस्ति। योगदर्शनं आयुर्वेदः च तस्य व्यवहारिकस्वरूपं प्रतिपादयतः।

संस्कृतभाषा एतेषां समस्तग्रन्थानां मूलभाषा अस्ति। एषा भाषा न केवलं ज्ञानस्य वहनं करोति, अपितु तस्य सूक्ष्मतमं अर्थं रसं च सम्यग्व्यक्तं करोति। अतः भारतीयज्ञानपरम्परायाः अध्ययनं संस्कृतभाषायाः माध्यमेन अधिकं प्रभावशाली भवति। अधुनापि, एषा ज्ञानपरम्परा नवदृष्ट्या शोध्या पाञ्चालीया च भवति। तस्य पुनरावलोकनं, संरक्षणं संवर्धनं च वर्त्तमानकाले अतीव आवश्यकं दृश्यते, यतः एषा परम्परा न केवलं अतीतनिष्ठा, अपि तु भविष्यनिर्माणाय अपि आधाररूपा अस्ति।

अस्यां परम्परायां न केवलं पुरुषैः, अपितु स्त्रीभिः अपि अतिशयं योगदानं कृतम्। संस्कृतभाषायां नारीकवीनां स्थानं विशिष्टम् अस्ति। ताः न केवलं सौन्दर्यशिल्पम्, अपि तु समाजवोधं, आत्मवोधं च प्रदर्शयन्ति।

**Keywords:** भारतीयज्ञानपरम्परा, संस्कृतनारीकवयः, ऋषिकाः, स्मृतिकारः, आलङ्कारिकः।

**भारतीयज्ञानपरम्परां प्रति संस्कृतनारीकवीनां योगदानम् —**

भारतीयज्ञानपरम्परां प्रति संस्कृतभाषायाः योगदानं गुरुत्वपूर्णमस्ति। अपिच भारतीयज्ञानपरम्परां

प्रति नारीकवीनां योगदानं महत्वपूर्णमस्ति। यथा कालिदास-अश्वघोष-माघ-भारवी-भवभूतिप्रभृतयः कवयः विभिन्नेषु समयेषु आविर्भुतं भूत्वा विविधान् काव्यकवितान् रचयित्वा संस्कृतसाहित्यं ऋद्धिमन्तं कृतवन्तः तथा अनेकाः नारीकवयः अपि वहुप्राचीनकालात् अस्यां पूण्यभूमौ भारतवर्षे अविर्भुतं भृत्वा निखिलं संस्कृतवाङ्मयं स्वरचनाधिः सुरभितं कृतवत्यः। पुरुषकवीनां रचनाभ्यः नारीकवीनां रचनाः अधिकाः सरलाः कोमलाश्च, यतोहि नारीणां हृदयः स्वभावतः कोमला। सहानुभूतिः, संबेदनशीलता, वात्स्यल्यं तथा सर्वोपरि स्वर्गीयप्रेम एव भवति नारीकवीनां कवितायाः विशेषत्वम्। वैदिककालात् नारीकवयः संस्कृतसाहित्ये स्वस्वपारदर्शितां प्रदर्शितवत्यः। अनेकाः नार्यः ऋक्वेदादीनां सूक्तयः प्रणयनं कृतवत्यः। ताः ऋषिकाः इत्युच्यते। विश्ववारा, आपला, घोषा, जुहू, शाश्वती, मान्धात्री, माधवी, शशीप्रभा, अनुलक्ष्मी, रेवा, रोहा, गार्गी प्रभृतयः नारीणाम् ऋषिकाणां वा नाम एतासु उल्लेखनीयमस्ति। नार्यः अपि वैदिकमन्त्रान् रचना सहैव तानि गानं कृत्वा यज्ञानि अकुर्वन् धर्मपत्न्याः अनुपस्थितौ कस्यापि यजमानस्य यज्ञकार्यं संम्पूर्णं नाभवत्।

परवर्त्तिकाले मैत्रेयी-लोपामुद्रादिप्रमुखनारीकवयः स्वस्याः प्रतिभावलेन विद्वांसं स्तम्भीभूतम् कृतवत्यः। विशिष्टः स्मृतिकारः याज्ञवल्क्यः स्वपत्न्याः मैत्रेर्याः शास्त्रार्थे पराजितम् अभवदिति प्रवादः अस्ति। काव्यकविताप्रणयनक्षेत्रेऽपि नारीणां भूमिका अतीव गुरुत्वपूर्णमस्ति। संस्कृतवाङ्मये अनेकासां नारीकवीनां नामोल्लेखमस्ति, यथा- पद्यावली-सुभाषितावली इत्यादिषु ग्रन्थेषु नारीकवीनां कवितां उद्धारं क्रियते; परं ताभ्यः प्रायतः अनेकासां विषये सम्यक् सम्पूर्णञ्च विवरणी अद्यावधिः

नोपलभ्यते विशिष्टः आलङ्कारिकः राजशेखरः शीला, विज्जिका, सुभद्रा, प्रभुदेवी, विकटनितम्बा इत्येतासां नारीकविनां नामोल्लेखं क्रियते। विविधेषु ग्रन्थेषु यासां नारीकविनां विविधाः काव्यकविताः उद्धारं क्रियते; ताः सन्ति, यथा जघनचपला, अविलम्बितसरस्वती, इन्दुलेखा, कुन्तिदेवी, चण्डालविद्या, नवमा, पद्मावती, मदालसा, रजकसरस्वती, लक्ष्मी, वीरसरस्वती सीता च। राजशेखर चरितनामक ग्रन्थे यासां नारीकवीनां नामोल्लेखमस्ति, ताः सन्ति, यथा- कामलीला, सुनन्दा, कनकवल्ली, मधुराङ्गी, ललिताङ्गी, विमलाङ्गी च। एताभ्यः याः नारीकवयः अधिकं लोकप्रियम् आसीत्, ताः आसन् – विज्जिका, वैजयन्ती, लिखिमा, त्रिवेणी, लक्ष्मी, सुन्दरवल्ली, ज्ञानसुन्दरी, कामाक्षी, सुभद्रा, फल्गुहस्तिनी, मोरिका, इन्दुलेखा, मारुला, विकटनितम्बा, शीलाभट्टारिका, मधुरवाणी, रामभद्राम्बा, तिरुमलाम्बा, गङ्गादेवी, देवकुमारीकाप्रभृतयः।

**वैदिकयुगे संस्कृतनारीकवयः** —

**गार्गी वाचक्नवी**—

गार्गी वैदिककाले प्रसिद्धा एकां विदुषी आसीत्। गार्गी वृहदारण्यकोपनिषदि प्रसिद्धा ऋषिका, या व्रह्मतत्त्वविषये याज्ञवल्क्यं प्रति गूढं सम्बादं कृतवती। तस्याः प्रश्नाः तत्त्वदर्शिनः वभूव—

"कस्मिन्नु खल्वखिले इदं प्रतिष्ठितं भवति ?"[१]

इत्यादिभिः सा व्रह्मान्वेषणं प्रतिपादयति।

**मैत्रेयी**—

याज्ञवल्क्यस्य पत्नी मैत्रेयी आत्मज्ञान विषये श्रेयस्करं सम्वादं याज्ञवल्क्येन सह कृतवती। तस्याः वाक्यम् —

"न वित्तेन अमृतत्वम् अशास्ति।"

एवं ज्ञानस्य परमं महत्त्वं सा प्रतिपादयते।

**लोपामुद्रा**—

अगस्त्यपत्नी लोपामुद्रा ऋक्वेदे स्वकीयं सूक्तं रचयित्वा भावनात्कम् आत्मबोधपरं च काव्यं निर्मितवती। तस्याः सूक्तं स्त्रीस्वरस्य आदिकाव्यप्रतिनिधित्वं करोति।

**मध्ययुगे संस्कृतनारीकवयः** —

**अवन्तीसुन्दरी** —

राजशेखरस्य पत्नी, या 'कविकान्ता' इति उपाध्यां प्राप्तवती। राजशेखरस्य महाकाव्येसु स्त्रीभावनायाः प्रकाशनाय सा प्रेरिका आसीत्।

**अक्का महादेवी**—

भक्तियुगे विशिष्टा कवयित्री या शिवभक्त्या आत्मसमर्पणं प्रतिपादयति तस्याः वाण्यः आतमवोधपूर्णाः दर्शनप्रधानाः च।

**आधुनिकयुगे संस्कृतनारीकवयः** —

**डॉ. पुष्पा दीक्षितः** —

नवीनकाले संस्कृतकाव्ये स्त्रीणां योगदानं दृष्टव्यं भवति। पुष्पा दीक्षित्याः कविता नाटकं तथा पाणिनीयव्याकरणविषये कार्यशालाः संस्कृतस्य प्रचारप्रसाराय अत्युत्तमा आसन्।

**डॉ. गुंजन विजयवर्गीयः** —

जानकीजीवनम् नामककाव्ये नारीचेतनायाः विषये शोधलेखं रचयित्वा सा स्त्रीस्वरस्य गाम्भीर्यं प्रकाशयति।

**शास्त्रेषु स्त्रीशक्तिः** —

भारतीय शास्त्रेषु स्त्री न केवलं सहधर्मिणी, अपि तु देवीरूपेण पूज्या। सरस्वती, दुर्गा, लक्ष्मी च इत्यादयः ज्ञानशक्तेः मूर्त्तिस्वरूपाणि। स्त्रीशक्तिरूपेण सा ज्ञानविकाशस्य अधिष्ठात्री दृश्यते।

एतदतिरिच्य अनेकाः नारीकवयः स्वस्याः काव्यरचनया भारतीयज्ञानपरम्परायाः उत्कर्षतां वर्द्धयन्ति। तासु कासांचित् संस्कृतनारीकवीनां संक्षिप्तपरिचयः अधः प्रदीयते।

**विज्जिका** —

सुप्रसिद्धा नारीकविः विज्जिका अनेकाः ललितकाव्यकविताः रचनां कृतवती। प्रसिद्धः आल-ङ्कारिकः राजशेखरः विज्जिकां 'विजयाङ्का' इत्युक्त्वा तां कालिदासस्य जनैका-समकक्षा कविभावेन चित्रितं क्रियते; यथा—

सरस्वतीव कर्णाटी विजयाङ्का जयत्यसौ।
या वैदर्भगिरां वासः कालिदासादनन्तरम्॥ [२]

अर्थात् विज्जिका विजयङ्का वा सरस्वती व विदूषी भवति। सा कर्णाटदेशस्य कवयित्री। वैदभीरीत्यां कविता प्रणयने आदौ विश्वकवेः कालिदासस्य द्वितीये च कवयित्र्याः विज्जिकायाः स्थानम्। विज्जिका कर्णाटस्य राजकन्या। तस्याः समयः ७१० ख्रीष्टाब्दतः ८५० ख्रीष्टाब्दमध्ये। साधारणतः मुक्तककाव्यप्रणयने विज्जिकायाः दक्षतायाः परिचयः प्राप्यते। सा एका ललितनिबन्धरचना कृतवती इति ज्ञायते; परं सा अधुना नोपलभ्यते।

**सुभद्रा**—

सुभद्रया विरचितानी पद्यानी यद्यपि अधुना विशेषभावे नोपलभ्यते; तथापि तस्याः एकः श्लोकः वल्लभदेवस्य सुभाषितावल्याः प्राप्यते। सुभद्रया रचितानी पद्यानी पूर्वेऽस्मिन् काले वहुल भावेन प्रचलितानि आसन्। विशिष्टः आलङ्कारिकः राजशेखरः सुभद्रायाः कवित्वस्य प्रशंसां कृत्वा कथयति; यथा—

पार्थस्य हृदये स्थानं लेभे खलु सुभद्रया।
कवीनाञ्च वचोवृत्तिचातुर्येण सुभद्रया॥ [३]

अर्थात् सुभद्रा यथा पार्थस्य अर्जुनस्य वा हृदये स्थानम् अलभत्, तथा कवयित्री सुभद्राऽपि स्वस्याः रचनामाधुर्येण कवीः समाकृष्य तेषां हृदये स्थानलाभं कृतवती।

**शीलाभट्टारिका** —

कवयित्र्याः अन्यनाम शीला अस्ति। तस्याः प्रशंसां कृत्वा राजशेखरः कथयति—

शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरीष्यते।
शीलाभट्टारिकावाचि वाणोक्तिषु च सा यदि॥ [४]

शीलाकवयित्र्याः कामपि निद्दिष्टां काव्यकवितां नोपलभ्यते। तथापि तस्याः एका कविता सुभाषितावल्याम् उद्धतस्य द्रक्ष्यते। यथा—

प्रियाविरहितस्याद्य हृदिचन्ता ममागता।
इति मत्वा गता निद्रा के कृतघ्नमुपासते॥ [५]

**प्रभुदेवी**—

प्रभुदेवी नाम्ना एका नारीकविः आसीत्। तस्या अपि किमपि निद्दिष्टं काव्यं नोपलभ्यते। तथापि तस्यां विषये आलङ्कारिकः राजशेखरः कथयति—

सूक्तीनां स्मरकेलीनां कलानाञ्च विलासभूः।
प्रभुदेवी कविर्लाटी गताऽपि हृदि तिष्ठति॥ [६]

**फल्गुहस्तिनी**—

यद्यपि संस्कृतसाहित्ये फल्गुहस्तिन्याः समस्ताः काव्यकविताः एतावदपर्यन्तम् आविष्कृताः भवितुं नार्हन्ति; तथाऽपि सुभाषितावल्यां ये द्वे पद्ये उद्धतं भवतः, तस्मात् तस्याः काव्यिकप्रतिभा स्पष्टरूपेण ज्ञायते।

**विकटनितम्बा**—

विकटनितम्बाया: कवित्वस्य प्रशंसा कृत्वा विशिष्ट: आलङ्कारिक: राजशेखर: कथयति-

के वैकट नितम्बेन जरां गुम्फेन रञ्जिता:।
निन्दन्ति निजकान्तानां न मौग्ध्यमधुरं वच:॥ [७]

जघनचपला, इन्दुलेखा, मारुला, मोरिका, विद्या, भवदेवीप्रभृतीनां नारीकवीणां किमपि निद्धिष्टं काव्यं नोपलभ्यते, तथापि तासां विविधा: नीतिपूर्णा: हृदयग्राह्यश्च कविता: सुभाषितवल्याम् उद्धृतं भवन्ति।

**जघनचपला**—

दुर्द्दिननिशीथपवने नि:सञ्चारासु नगरवीथीषु।
पत्यौविदेशयाते परं सुखं जघनचपलाया:॥ [८]

**इन्दुलेखा**—

एके वारिनिधौ प्रवेशमपरे लोकान्तरालोकनम्
केचित्पावकयोगितां निजगदु: क्षीणेऽह्नि चण्डार्च्चष:।
मिथ्याचैतदसाक्षकं प्रियसखि! प्रत्यक्षतीव्रातपम्
मन्येऽहं पुनरध्वनीनरमणी चेतोऽधिशेते रवि:॥ [९]

**मारुला**—

कृशाकेनासित्वं प्रकृतिरियमङ्गस्यननु मे
मलाधूम्रा कस्माद् गुरुजनगृहे पाचकतया।
स्मरस्यस्मान् कच्चित् नहि नहि नहीत्येवमगमत्
स्मरोत्कम्पा वाला ममहृदि नपित्य प्ररुदिता॥ [१०]

**गौरिका**—

मागच्छ प्रमदाप्रिय प्रियशतै र्भूयस्त्वमुक्तो मया
वाला प्राङ्गणमागतेन भवता प्राप्नोति निष्ठापराम्।
किं चान्यत् कुचभारपीडनसहैर्यत्नप्रवन्धैरपि
क्रूटत् कञ्चुकजालकैरनुदिनं नि:सूत्रमस्मद्गृहम्॥ [११]

**विद्या**—

किंशुककलिकान्त गतमिन्दुकलास्पर्द्धिकेसरंभाति।
रक्तविलोलेकपिहितं धनुरिव जतुमुद्रितमनङ्गम्॥ [१२]

**भवदेवी**—

सजन्मानौ तुल्यावलिजनभुवा जन्म च सह
प्रवृद्धौ नाम्नाच स्तनइति समानावुदयिनौ।
मिथ:सीमामात्रे यदिदमनयोर्मण्डलवतो:
अपिस्पर्द्धायुद्धं तदिह च नमस्य: कठिनिमा॥ [१३]

**प्रियम्बदा**—

पूर्ववङ्गस्य फरिदपुरनिवासी नारीकवेः प्रियम्बदायाः पितुः नाम शिवरामः तथा पत्युः नाम रघुनाथः। तस्याः समयः सप्तदशशताब्दी सा 'श्यामरहस्य' नामकम् एकं संस्कृतकाव्यं रचनाम् अकरोत्। व्रजसुन्दरं भगवतं श्रीकृष्णचन्द्रं वन्दयित्वा कवयित्री प्रिमम्बदा लिखितवती, यथा—

कालिन्दीपुलिनेषु केलिकलनं कंसादिदैत्यद्विषं
गोपालीभिरभिष्टूतं व्रजवधू नेत्रोत्पलैरर्चितं।
वर्हालङ्कृतमस्तकं सुललितैरङ्गैस्त्रिभङ्ग भजे
गोविन्दं व्रजसुन्दरं भवहरं वंशीधरं श्यामलम्॥ [१४]

**वैजयन्ती**—

कवयित्र्याः अन्यनाम अपि जयन्ती अस्ति। तस्याः समयः सप्तदशशताब्दी तस्याः पितुः नाम मुरभट्टः। सा संस्कृते एका सुप्रसिद्धा पण्डिता आसित्। वैजयन्ती तस्य पितुः संस्कृतम् अध्ययनम् अकरोत्। सा मीमांसाशास्त्रे अतीव दक्षा आसित्। तस्याः पतिः कृष्णनाथः अपि एकः पण्डितः आसित्। एकदा कवयित्र्याः पतिः कृष्णनाथः ''अत्रतु नोक्तं; तत्रापि नोक्तं" इदम् वाक्यम् नाववोध्यते स्म। अस्य अर्थः सः अकरोत् अत्रतु नोक्तं = अत्र न कथ्यते; तत्रापि नोक्तं =तत्रापि न कथ्यते; परं प्रसङ्गानुसारेण उभयोः स्थानयोः तं विषयं कथनात् स्वामीनः महान् सन्देह अजातम्। स्वामीनः एतं सन्देहं मोचयित्वा वैजयन्ती अकथयत् यत्, अत्र तुना उक्तम् अर्थात् अत्र 'तु' इति पदेन कथ्यते तथा तत्र अपिना उक्तम् अर्थात् तत्र 'अपि' इति पदेन कथ्यते। सा स्वस्याः पतिना सः मिलित्वा 'आनन्दलतिकाचम्पू' नामकम् एकम् चम्पूकाव्यं रचनाम् अकरोताम्। तदर्थं कृष्णनाथः कथयति –

"आनन्दलतिकाचम्पूर्येनाकारि स्त्रिया सह।" [१५]

**त्रिवेणी**—

नारीकविः त्रीवेणी उदयेन्द्रपूरम्-अनन्ताचार्यस्य कन्या। तस्याः पिता यादव-राघव-पाण्डवीयं नामकम् एकस्य काव्यस्य रचनान्तरम् उक्ता कन्या जन्म भवन् कारणात् तस्याः नाम त्रीवेणी अभवत्। तस्याः समयः अष्टादश शताब्दी सा अनेकानि भक्तिकाव्यानि गीतिकाव्यानि च रचनां क्रियते।

**ज्ञानसुन्दरी**—

ज्ञानसुन्दरी एका नृत्यप्रवीणा कवयित्री आसित्। सा श्रीवत्सगोत्रोत्भव कुप्पुस्वामीशास्त्र्याः शिष्या आसित्। १११० ख्रीष्टाब्दे सा इहलीला सम्बरणम् अकरोत्। सा अनेकानि काव्यानि अरचयन् इति ज्ञायते परं षट् स्तवकसम्बलितम् 'हालास्यचम्पू' नामकम् एकमात्रं चम्पुकाव्यं तस्याः उपलभ्यते। सा अनुप्रास वहुलायां कवितारचनायां सिद्धहस्ता आसित्।

**रामभद्राम्बा**—

रामभद्राम्बा रघुनाथाभ्युदयकाव्यं रचितवती। तस्याः जन्मस्थानं ताञ्जोरः, अतः सा स्वकाव्ये ताञ्जोरस्य राज्ञः राघुनाथस्य महत्वविषये वर्णनां कृतवती। तस्य राजदरवारे मधुरवाणी नाम विदुषी अतीव प्रसिद्धिम् अर्जितवती। सा रघुनाथस्य आन्ध्र-रामायणं संस्कृतभाषायां सुमधुरश्लोकमाध्यमेन अनुवादम् अकरोत्। अस्मिन् समुदायः ४४ सर्गाः सन्ति।

**तिरुमल्लाम्बा**—

तिरुमल्लाम्बा 'वरदाम्बिकापरिणयः' इति एकं सुविस्तृतं चम्पूकाव्यं रचितवती। इदं चम्पूकाव्यं प्रकाशितमस्ति।

**देवकुमारीका**—

उदयपुरराजवंशोद्भवा देवकुमारीका 'वैदनाथ प्रसादप्रसस्तिः' नामकं प्रसस्तिकाव्यं विरचिता। अस्मिन् समुदायः ५ प्रकरणानि १४२ श्लोकाश्च सन्ति।

**गङ्गादेवी**—

गङ्गादेवी 'मथुराविजयः' नामकम् एकम् ऐतिहासिककाव्यं विरचिता। ऐतिहासिकदृष्टिकोणात् अस्य काव्यस्य यथेष्टं गुरुत्वम् अस्ति।

**उपसंहारः —**

एवं दृष्ट्वा ज्ञायते यत् संस्कृतनारीकवयः न केवलं काव्यनिर्मात्री, अपि तु चिन्तक्यः दार्शनिक्यः, समाजचिन्तक्यः च आसन्। तासां काव्यं तत्त्वज्ञानं च अस्मान् अतीतानां स्त्रीशक्तेः बोधनं करोति। भारतीयज्ञान परम्परायां तासां योगदानं अमूल्यम् अस्ति, यत् अद्यापि प्रासङ्गिकं प्रेरणादायकं च।

इथं भावेन अनेकाः नारीकवयः विविधानी काव्य-चम्पू-प्रवन्धकाव्य-ऐतिहासिककाव्यानि विरच्य पुरुषाणां समकक्षं भुत्वा संस्कृतसाहित्यवाङ्मयं समृधेन सह भारतवर्षस्य ऐतिह्यं, परम्परां तथा शिक्षायाः गाम्भीर्यञ्च निखिले विश्वे पतिपादयित्वा असीमं गौरवम् अर्जयन्ति। एतेषु मुख्य नारीकवीन् समानं प्रदर्शयित्वा धनदेवः शार्ङ्गधरपद्धत्यां कथयति।

"शीलाविज्जामारुला मोरिकाद्याः
काव्यं कर्त्तुंसन्ति विज्ञाः स्त्रियोऽपि।
विद्यांवेत्तुंवादिनो निवजेतुं
विश्वं वक्तुंयः प्रवीणःस वद्यः।"[१६]

## Endnotes

१. बृहदारण्यकोपनिषद्
२. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४१३
३. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४१४
४. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४१५
५. सुभाषितावली
६. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४१५
७. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४१५
८. सुभाषितावली
९. सुभाषितावली
१०. सुभाषितावली
११. सुभाषितावली

१२. सुभाषितावली
१३. काव्यावली
१४. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४१६
१५. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४१७
१६. संस्कृत साहित्य इतिहास, प्र. हरेकृष्ण शतपथी, पृ.-४

## Bibliography

- त्रिपाठी, डॉ. रामानन्द, ऋग्वेदे स्त्रीकवयः, लालबहादुरशास्त्री संस्कृतविद्यापीठः, दिल्ली
- भटनागर, डॉ. शोभना, वैदिक स्त्रियाँ और विदुषियाँ, चौखम्बा संस्कृत प्रकाशन, वाराणसी
- मिश्रः, प्रो.गोविन्दकान्त, भारतीयस्त्रीकवयः, राष्ट्रीय संस्कृत संस्थान, नव देहली
- वर्मा, डॉ. राधा, संस्कृतसाहित्ये स्त्रीणां योगदानम्, भारती प्रकाशनम्, जयपुरम्
- शतपथी, प्र. हरेकृष्ण, संस्कृत साहित्य का इतिहास, किताव महल कलेज स्कोयार, कटक
- शर्मा, डॉ मञ्जुश्री, स्त्रीणां काव्यसेवा, संस्कृतभारती प्रकाशनम्
- Dalmia, Dr. Vasudha, Contributions of women to Sanskrit Literature, Motilal Banarasidass Publishers, Delhi
- Ramaswamy, Dr. S.R., Women in Sanskrit Literature, Bharatiya Vidya Bhavan, Mumbai